नतपालिनि नुतशूलिनि - नलिनमालिनी
राग : कोसलं
ताळ : तिश्रगति

पल्लवि :

नतपालिनि नुतशूलिनि – नलिनमालिनी
परिपालय परिपालय – दीप्तिशालिनी

चरणः

दिव्यदीप्ति देदीपित दिग्वलया धीनिलया
दीनावन  दीक्षाघन दीर्घांबक रुचिनिचया
वर वरदाभय सुकरा सुरपरिपालन चतुरा
निरवधिकामल सुषमा परिपूरित मतिसारा ...१

देवसार मूर्तिरंब वेदसार रूपिणी
सिंहवाहिनी त्वमंब हिंस्रभाव हारिणी
साधुहृदयमंदिरा त्वं हि नून मिंदिरा
सच्चिदानंद सुंदरा कार भाव बंधुरा ...२